[५६९] [1]भूयसश्च वाचिकायाः सङ्ख्यायाः प्रत्यय इष्यते । (म. भा. २.३८१)

इह[2] न भवति, एको भागो निमानमस्य इति । भूयसः इति च प्रत्ययार्थात् प्रकृत्यर्थस्याधिक्यमात्रं विवक्षितम् । बहुत्वमतन्त्रं, तेन द्विशब्दादपि भवति । गुणशब्दः समानावयववचनः । तेनेह न भवति, द्वौ [3]भागौ यवानामध्यर्धं [4]उदश्वितः (म. भा. २.३८२) इति ।

[५७०] निमेये चापि दृश्यते । (म. भा. २.३८२)

निमेये वर्तमानायाः सङ्ख्याया निमाने प्रत्ययो दृश्यते । [5]उदश्वितो द्वौ भागौ निमेयमस्य यवभागस्य द्विमया यवा उदश्वितः । त्रिमया यवा [6]उदश्वितः । चतुर्मयाः (म. भा. २.३८२) ।

गुणस्य इति किम् ? द्वौ व्रीहियवौ निमानमस्योदश्वितः । निमाने इति किम् ? द्वौ गुणौ क्षीरस्य एकस्तैलस्य, द्विगुणं पच्यते तैलं क्षीरेण [7]इत्यत्र मा भूत् ॥

## तस्य पूरणे डट् । (४८/१८४९)

तस्य इति षष्ठीसमर्थात् सङ्ख्यावाचिनः प्रातिपदिकात् पूरणे इत्यस्मिन्नर्थे डट् प्रत्ययो भवति । पूर्यतेऽनेन इति पूरणम् । येन सङ्ख्या [8]सङ्ख्यानं पूर्यते [9]सम्पद्यते, स तस्याः[10] पूरणः । एकादशानां पूरणः एकादशः । [11]त्रयोदशः । [12]यस्मिन्नुपसञ्जाते[13]ऽन्या सङ्ख्या सम्पद्यते स प्रत्ययार्थः । इह न भवति, पञ्चानां [14]मुष्टिकानां पूरणो घटः इति ॥

## नान्तादसङ्ख्यादेर्मट् । (४९/१८५०)

डट् इति [15]वर्तते । [16]नकारान्तात् सङ्ख्यावाचिनः प्रातिपदिकात् असंख्यादेः परस्य डटो मडागमो भवति । नान्तात् इति पञ्चमी डट [17]आगमसम्बन्धे षष्ठीं प्रकल्पयति । पञ्चानां पूरणः पञ्चमः । सप्तमः[18] । नान्तात् इति किम् ? विंशतेः पूरणः [19]विंशः । असङ्ख्यादेः इति किम् ? एकादशानां पूरणः एकादशः ॥

## थट् च छन्दसि । (५०/३४०७)

नान्तादसङ्ख्यादेः [20]परस्य डटः छन्दसि विषये थडागमो भवति । चकारात् पक्षे मडपि [21]भवति । 'पर्णमयानि पञ्चथानि भवन्ति ' (काठ. सं. ८.२) । 'पञ्चथः ' (काठ. सं. ९.३) । 'सप्तथः (काठ.सं. ३७.११) । [22]मट् – 'पञ्चममिन्द्रिय[22]स्यापाक्रामत् ' (काठ. सं. ९.१२) ॥

---

1. भूयश्च वाचिकायाः क. ड, भूयश्च ह. 2. तु इत्यधिकम् ह. 3. भागौ नास्ति क. 4. भागोऽस्त्यस्याम् इत्यधिकम् फ, चापि इत्यधिकम् ड. 5. उदश्वित्यौ क. 6. उदश्वितः नास्ति क. ह. 7. अत्र नास्ति क. 8. सङ्ख्यानं नास्ति ह, सङ्ख्यायाः सङ्ख्यानं क. 9. सम्पाद्यते क. 10. संख्यायाः इत्यधिकम् ड. 11. द्वादशः क. ड. फ, त्रयोदशः नास्ति ब. क. ड. 12. यस्मिन्नुपजाते ब. क. ड. ह. 13. सा ब. क. ड. ह. 14. मुष्टीनाम् क. 15. अनुवर्तते क. ह. 16. नकारान्तात् नास्ति क. ह. 17. आगमसम्बन्धेन क. 18. अष्टमः इत्यधिकम् क. ह. 19. विंशकः ह. 20. प्रातिपदिकात् इत्यधिकम् फ. 21. अभ्यनुज्ञायते ब. क. ड. फ. ह. 22. मटः खल्वपि क. 23. °स्योपाक्रमेत् क, इन्द्रियमस्य मुद्रितः पाठः